DIAMOND MOUNTAIN DIAMOND MOUNTAIN UNIVERSITY

# संस्कृत

READINGS IN SANSKRIT
PART 1

# WEEK TWO

DIAMOND MOUNTAIN UNIVERSITY

Readings in Sanskrit, 1
Brian Smith (Ven. Sumati Marut) (brian.smith@ucr.edu)

# Fall Term, Class Schedule

**WEEK TWO: Thursday, Oct. 4, 2007 1:00 – 4:00 PM**

A. Quiz
B. Review of homework
C. Introduction to Arya Nagarjuna's मूलमध्यमककारिका, chapters 19 and 20

**HOMEWORK:**

1. Provide a word by word English translation of Chapters19 and 20 of Arya Nagarjuna's मूलमध्यमककारिका (see below).
2. Provide a word by word English translation of the verses from the भगवद् गीता below.

# मूलमध्यमककारिका

## कालपरीक्षा नामैकोनविंशतितमं प्रकरणं

प्रत्युत्पन्नो ऽनागतश्च यद्यतीतमपेक्ष्य हि।
प्रत्युत्पन्नो ऽनागतश्च काले ऽतीते भविष्यतः॥ १

प्रत्युत्पन्नो ऽनागतश्च न स्तस्तत्र पुनर्यदि।
प्रत्युत्पन्नो ऽनागतश्च स्यातां कथमपेक्ष्य तम्॥ २

अनपेक्ष्य पुनः सिद्धिर्नातीतं विद्यते तयोः।
प्रत्युत्पन्नो ऽनागतश्च तस्मात्कालो न विद्य्तते॥ ३

एतेनैवावशिष्टौ द्वौ क्रमेण परिवर्तकौ।
उत्तमाधममध्यादीनेकत्वादींश्च लक्षयेत्॥ ४

नास्थितो गृह्ये कालः स्थितः कालो न विद्यते।
यो गृह्येतागृहीतश्च कालः प्रज्ञप्यते कथं॥ ५

भावं प्रतीत्य कालश्चेत्कालो भावादृते कुतः।
न च कश्चन भावो ऽस्ति कुतः कालो भविष्यति॥ ६

*****

## सामग्रीपरीक्षा नाम विंशतितमं प्रकरणं

हेतोश्च प्रत्ययानां च सामग्र्या जायते यदि।
फलमस्ति च सामग्र्यां सामग्र्या जायते कथं॥ १

हेतोश्च प्रत्ययानां च सामग्र्या जायते यदि।
फलं नास्ति च सामग्र्यां सामग्र्या जायति कथं॥ २

हेतोश्च प्रत्ययानां च सामग्र्यामस्ति चेत्फलं।
गृह्येत ननु सामग्र्यां सामग्र्यां च न गृह्यते॥ ३

हेतोश्च प्रत्ययानां च सामग्र्यां नास्ति चेत्फलं।
हेतवः प्रत्ययाश्च स्युरहेतुप्रत्ययैः समाः॥ ४

हेतुकं फलस्य दत्त्वा यदि हेतुर् निरुध्यते ।
यद् दत्तं यन् निरुद्धं च हेतोर् आत्मद्वयं भवेत् ॥५

हेतुकं फलस्यादत्त्वा च यदि हेतुर्निरुध्यते।
हेतौ निरुद्धे जातं तत्फलमाहेतुकं भवेत्॥ ६

फलं सहैव सामग्र्या यदि प्रादुर्भवेत्पुनः।
एककालौ प्रसज्येते जनको यश्च जन्यते॥ ७

पूर्वमेव च सामग्र्याः फलं प्रादुर्भवेद्यदि।
हेतुप्रत्ययनिर्मुक्तं फलमाहेतुकं भवेत्॥ ८

निरुद्धे चेत्फलं हेतौ हेतोः संक्रमणं भवेत्।
पूर्वजातस्य हेतोश्च पुनर्जन्म प्रसज्यते॥ ९

जनयेत्फलमुत्पन्नं निरुद्धो ऽस्तंगतः कथं।
तिष्ठन्नपि कथं हेतुः फलेन जनयेद्वृतः॥ १०

अथावृतः फलेनासौ कतमज्जनयेत्फलं।
न ह्यदृष्ट्वा वा दृष्ट्वा वा हेतुर्जनयते फलं॥ ११

नातीतस्य ह्यतीतेन फलस्य सह हेतुना।
नाजातेन न जातेन संगतिर्जातु विद्यते॥ १२

न जातस्य ह्यजातेन फलस्य सह हेतुना।
नातीतेन न जातेन संगतिर्जातु विद्यते॥ १३

नाजातस्य हि जातेन फलस्य सह हेतुना।
नाजातेन न नष्तेन संगतिर्जातु विद्यते॥ १४

असत्यां संगतौ हेतुः कथं जनयते फलं।
सत्यां वा संगतौ हेतुः कथं जनयते फलं॥ १५

हेतुः फलेन शून्यश्चेत्कथं जनयते फलं।
हेतुः फलेनाशून्यश्चेत्कथं जनयते फलं॥ १६

फलं नोत्पत्स्यतेऽशून्यमशून्यं न निरोत्स्यते।
अनिरुद्धमनुत्पन्नमशून्यं तद्भविष्यति॥ १७

कथमुत्पत्स्यते शून्यं कथं शून्यं निरोत्स्यते।
शून्यमप्यनिरुद्धं तदनुत्पन्नं प्रसज्यते॥ १८

हेतोः फलस्य चैकत्वं न हि जातूपपद्यते।
हेतोः फलस्य चान्यत्वं न हि जातूपपद्यते॥ १९

एकत्वे फलहेत्वोः स्यादैक्यं जनकजन्ययोः।
पृथक्त्वे फलहेत्वोः स्यात्तुल्यु हेतुरहेतुना॥ २०

फलं स्वभावसद्भूतं किं हेतुर्जनयिष्यति।
फलं स्वभावासद्भूतं किं हेतुर्जनयिष्यति॥ २१

न चाजनयमानस्य हेतुत्वमुपपद्यते।
हेतुत्वानुपपत्तौ च फलं कस्य भविष्यति॥ २२

न च प्रत्ययहेतूनामियमात्मानमात्मना।
या सामग्री जनयते सा कथं जनयेत्फलं॥ २३

न सामग्रीकृतं फलं नासामग्रीकृतं फलं।
अस्ति प्रत्ययसामग्री कुत एव फलं विना॥ २४

*****

## भगवद् गीता

अद्वेष्टा सर्वभूतानां मैत्रः करुण एव च।
निर्ममो निरहङ्कारः समदुःखसुखः क्षमी॥ १२.१३

सन्तुष्टः सततं योगी यतात्मा दृढनिश्चयः।
मय्यर्पितमनोबुद्धिर्यो मद्भक्तः स मे प्रियः॥ १२.१४

यस्मान्नोद्विजते लोको लोकान्नोद्विजते च यः।
हर्षामर्षभयोद्वेगैर्मुक्यो यः स च मे प्रियः॥ १२.१५

अनपेक्षः शुचिर्दक्ष उदासीनो गतव्यथः।
सर्वारम्भपरित्यागी यो मद्भक्तः स मे प्रियः॥ १२.१६

यो न ष्यति न द्वेष्टि न शोचति न काङ्क्षति ।

शुभाशुभपरित्यागी भक्तिमान्यः स मे प्रियः ॥ १२.१७

समः शत्रौ च मित्रे च तथा मानापमानयोः ।

शीतोष्णसुखदुःखेषु समः सङ्गविवर्जितः ॥ १२.१८

तुल्यनिन्दास्तुतिर्मौनी सन्तुष्टो येनकेनचित् ।

अनिकेतः स्थिरमतिर्भक्तिमान्मे प्रिये नरः ॥ १२.१९